# अभ्यास प्रश्नपत्रम्-1

**समय: होरात्रयम्** **पूर्णाङ्का: 90**

**निर्देश:** 1. अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।

2. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

3. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।

5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

## खण्ड: 'क'—अपठितांश-अवबोधनम् 10 अङ्का:

**1. निम्नलिखितं अनुच्छेदं पठित्वा एतदाधारितानाम् प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायाम् लिखत—**

**अनुच्छेद:**

प्राय: सामान्यानां जनानाम् इयं प्रवृत्ति: यत् ते मधुरमेव श्रोतुमिच्छन्ति मधुरमेव च वदन्ति। चाटुकारा: सदैव मधुरं कथयन्ति किन्तु तेन कस्यापि कल्याणं न भवितुं शक्नोति। हितकरं औषधं, हितकरं च वच: कटु: एव भवत:। कदाचित् शरीरे महान् स्फोट: जायते। चिकित्सक: तं शस्त्रेण छित्वा औषधेन पूरयति। तस्मिन् काले महती पीडा भवति पश्चात् पूरिते व्रणे जन: परं सुखमनुभवति। एवं हि हितकर: वच: प्राय: परुष कटु च प्रतीयते परं कल्याणकारि तथैव भवति। हितैषिण: पुरुषा: केवलं मधुरं नोक्त्वा सत्यं हितकरमेव कथयन्ति। 10

**प्रश्ना:—** ½ × 4 = 2

**I. एकपदेन उत्तरत–**

1. चाटुकारा: कीदृशं वदन्ति?
2. हितैषिण: पुरुषा: किं कटु: वदन्ति?
3. चिकित्सकं कं शस्त्रेण छित्वा औषधेन पूरयति?
4. के सत्यं हितकरमेव कथयन्ति?

**II. पूर्णवाक्येन उत्तरत—** 2 × 2 = 4

1. चिकित्सक: कं शस्त्रेण छित्वा औषधेन पूरयति?
2. पुरुषं कदा पीडा भवति?

**III. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

**IV. भाषिककार्यम्—** ½ × 4 = 2

1. 'हितैषिण: पुरुषा:' अनयो: पदयो: किं विशेषणपदम्?
2. 'महती पीडा' अनयो: पदयो: किं विशेष्यपदम्?
3. 'कथयित्वा' अस्य पदस्य समानार्थकं गद्यांशात् चित्वा लिखत।

   (*i*) छित्वा (*ii*) उक्त्वा (*iii*) कथयन्ति (*iv*) इच्छन्ति

4. श्रोतुम् अत्र क: प्रत्यय: प्रयुक्त: ?

   (*i*) तम् (*ii*) क्त (*iii*) तुमुन् (*iv*) तव्यत्

JS SUNIL TUTORIAL

## खण्डः 'ख'—रचनात्मकं-लेखनम् 15 अङ्काः

### पत्रलेखनम्

**2.** भवान् क्षितिजः। भवतः निवासः छात्रावासे अस्ति। पितरम् प्रति धनादेशं प्रेषणार्थम् लिखितमिदं पत्रम् मञ्जूषायाः उचितैः पदैः सम्पूरयत। ½ × 10 = 5

परीक्षाभवनम्

(i) ..................................

दिनाङ्कः 05.5.20XX

(ii) ..................................

सादर चरणस्पर्श।

अद्य तव (iii) .................................. प्राप्तम्। अत्र सर्वं कुशलम्। मया अद्यैव परीक्षायाः (iv) .................................. अपि प्राप्तः। अहम् (v) .................................. उत्तीर्णः अस्मि। अग्रिम कक्षायाम् (vi) .................................. धनस्य आवश्यकता अस्ति। अतः भवान् धनादेशेन पञ्चसहस्ररुप्यकाणि (vii) .................................. विस्तरेण पुनः (viii) .................................. ।

(ix) .................................. मे प्रणामाञ्जलिः पत्रम् प्रतीक्षमाणः।

भवताम् पुत्रः

(x) ..................................

**मञ्जूषा—** प्रवेशलब्धुम्, परिणामः, मुम्बईतः, प्रेषयतु, आदरणीय-पितृचरणाः, लेखिष्यामि, प्रथमश्रेण्याम्, पत्रम्, क्षितिजः, मातृपितृचरणयोः।

### चित्रवर्णनम्

**3.** अधोप्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाम् प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत— 2 × 5 = 10



**मञ्जूषा—** श्रमिकाः, इष्टकानि, प्रस्तराणि, शिरसि, उडढ्वा, नार्यः, वृद्धः, प्रसन्नमुखः, बालश्रमिकः।

**अथवा**

### अनुच्छेदलेखनम्

मञ्जूषायां प्रदत्तशब्दानां सहायतया 'स्वच्छता' इति विषयं अधिकृत्य पञ्चसंस्कृतवाक्यानि लिखत। 2 × 5 = 10

**मञ्जूषा—** अवकरं, क्षेपणीयम्, कर्गदपत्राणि, अवकरपात्रेषु, स्वच्छतायाः, मार्गेषु, इतस्ततः आवरणानि।

ISJUIL TUTORIAL

## खण्डः 'ग'—अनुप्रयुक्त-व्याकरणम् 30 अङ्काः

4. (अ) रेखाङ्कितपदस्य का विभक्तिः ? 1 × 2 = 2

1. मानं हि महत्ताम् धनम्।

(i) सप्तमी (ii) द्वितीया (iii) षष्ठी (iv) चतुर्थी

2. विद्वासः सद्व्यवहारमेव प्रशंसन्ति।

(i) प्रथमा (ii) द्वितीया (iii) तृतीया (iv) षष्ठी

(आ) अधोप्रदत्तशब्दस्य समुचितरूपेण रिक्तस्थानानि पूरयत— ½ × 8 = 4

1. अत्र ................................ कदा आगतौ ?

(i) भवान् (ii) भवन्तौ (iii) भवन्तः

2. तस्य ................................ कलुषितः वर्तते।

(i) आत्मा (ii) आत्मनौ (iii) आत्मनः

3. आज्ञा ................................ हि अविचारणीया।

(i) विद्वासः (ii) विदुषाम् (iii) विदुषा (iv) विदुषे

4. वनेषु ................................ किमर्थम् तपन्ति?

(i) भवन्तौ (ii) भवन्तः (iii) भवत् (iv) भवता

5. किं ................................ नाम रश्मिः वर्तते?

(i) भवता (ii) भवतस्य (iii) भवत्याः (iv) भवताम्

6. ................................ सेवा जीवनवर्धिका भवति।

(i) राज्ञा (ii) राज्ञः (iii) राज्ञाम् (iv) राजा

7. ................................ बालकस्य माता तम् आह्वयति।

(i) गच्छतः (ii) गच्छते (iii) गच्छतस्य (iv) गच्छताम्

8. ................................ रामः श्रेष्ठः आसीत्।

(i) राजानाम् (ii) राज्ञाम् (iii) राज्ञः (iv) राज्ञा

5. 1. रेखाङ्कितपदे का विभक्तिः किं च वचनम् ? 1 × 2 = 2

1. एतस्मिन् उद्याने चत्वारः वृक्षाः अपतन्।

(i) प्रथमा (ii) तृतीया (iii) द्वितीया (iv) चतुर्थी

2. इयम् एका कथा अस्ति।

(i) द्वितीया (ii) प्रथमा (iii) षष्ठी (iv) सप्तमी

2. अधोलिखितवाक्ये रिक्तस्थाने किं पदं भविष्यति ? 1 × 4 = 4

1. ................................ नदीषु गङ्गा सर्वश्रेष्ठा।

(i) चतुर्षु (ii) चत्वारिषु (iii) चतसृषु (iv) चतसृसु

2. मम पार्श्वे ................................ कलमे स्तः।

(i) द्वि (ii) द्वे (iii) द्वयोः (iv) द्वौ

JSUNIL TUTORIAL

3. यूयम् कक्षायाम् .................................... आम्राणि वितरत।

(i) पञ्च (ii) पञ्चानि (iii) पञ्चाः (iv) पञ्चः

4. .................................... बालके सर्वे गुणाः सन्ति।

(i) एके (ii) एकस्मिन् (iii) एकस्यां (iv) एकः

**6. 1. अधोलिखितवाक्येषु कोष्ठके प्रदत्तधातूनां लोट्लकारे क्रियापदानां किं समुचितं पदं भविष्यति?** **1 × 3 = 3**

1. युवां शीघ्रं फलानि .................................... । (भक्ष्)

(i) भक्षयतु (ii) भक्षयतम् (iii) भक्षयत

2. आकाशात् जलविन्दवः .................................... । (पत्)

(i) पततु (ii) पतताम् (iii) पतन्तु

3. भवान् बालेभ्यः मा .................................... । (क्रुध्)

(i) क्रुध्यतु (ii) क्रुध्यन्तु (iii) क्रुध्य

**2. अधोलिखितवाक्येषु विधिलिङ् क्रियापदानि योजयत—** **1 × 3 = 3**

1. भवन्तौ दीनेषु न .................................... ।

(i) क्रुध्येयुः (ii) क्रुध्येः (iii) क्रुध्येताम् (iv) क्रुध्येतम्

2. छात्राः वाटिकायाम् पुष्पाणि न .................................... ।

(i) त्रोटयेत् (ii) त्रोटयेयुः (iii) त्रोटयन्तु (iv) अत्रोटयत्

3. यूयम् प्रातः व्यायामं .................................... ।

(i) कुर्यात् (ii) कुर्युः (iii) कुर्यात (iv) कुर्याम

**7. 1. अधोलिखितवाक्येषु रिक्तस्थानानि समुचितपदैः पूरयत—** **1 × 3 = 3**

1. तया .................................... प्रयोजनं नास्ति या न लिखति।

(i) लेखन्या (ii) लेखन्याः (iii) लेखनीभ्यः (iv) लेखनीम्

2. अयम् औषधिः .................................... अलम्।

(i) पीडितेभ्यः (ii) पीडितस्य (iii) पीडितेन (iv) पीडितानाम्

3. धर्मः .................................... प्रथमः।

(i) पुरुषार्थम् (ii) पुरुषार्थे (iii) पुरुषार्थाणाम् (iv) पुरुषार्थेभ्यः

**2. अधोलिखितेषु अनुच्छेदे मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयत—** **1 × 6 = 6**

पिता (i) .................................... अपृच्छत् भवतः (ii) .................................... अनुरागः अस्ति शिशुः अवदत्—अहं चिन्तयामि यत् सा (iii) .................................... स्निह्यति। पिता अवगच्छत् यत् स (iv) .................................... अति विश्वसिति अहं। (v) .................................... प्रयोजनेन एनम् धर्मसंकटे पातयामि सत्यमेव माता विश्वे श्रेष्ठः। अहम् (vi) .................................... स्निह्यामि।

**मञ्जूषा—** केन, मातरि, मयि, कस्मिन्, शिशुम्, मातरि।

JSUNIL TUTORIAL

8. 1. धातु + क्त/क्तवतु प्रत्यययोगेन निर्मितम् उचितं पदं चित्वा लिखत। 1 × 3 = 3

1. नीरजः पत्रम् ………………………………… ।

(i) लिखितवान् (ii) लिखितः (iii) लिखितम् (iv) लिखितवत्

2. वानराः फलानि ………………………………… ।

(i) भक्षितवान् (ii) भक्षितवन्तः (iii) भक्षिताः (iv) भक्षितवत्

3. किं त्वया चलचित्रम् ………………………………… ?

(i) दृष्टा (ii) दृष्टम् (iii) दर्शितम् (iv) दृष्टवान्

2. निर्दिष्टधातु प्रत्यययोगेन रूपेण वाक्यपूर्तिं कुरुत— 1 × 3 = 3

1. शिशुः प्रश्नं ………………………………… । (पृच्छ् + क्तवतु)

2. फलं ………………………………… दूषितं भवति। (पत् + शतृ)

3. ………………………………… वृक्षाः पुष्पाणि पातयन्ति। (कम्प् + शानच्)

## खण्डः 'घ'—पठितांश-अवबोधनम् 35 अङ्काः

9. अधोलिखितं गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत—

(अ) गद्यांशः

ततश्च सा साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता। स च मुनिः बद्धाञ्जलिः तामवदत्—"कथं त्वया अनन्यगोचरो बलाकावृत्तान्तो ज्ञात इति ब्रूहि, ततो भिक्षां ग्रहीष्ये।" साऽवदत्—"मुनेः न भर्तृसेवायाः अपरं कञ्चन धर्मं करोम्यहम्। तत्प्रसादेन एव मे एतादृशं विज्ञानम्। किञ्च इतः धर्मव्याधाख्यं कञ्चन मांसविक्रयिणं गत्वा एतत् पृच्छ। ततस्ते श्रेयो भविष्यति त्वं च निरहङ्कारः भविष्यसि इति"। एवं सर्वविदा पतिव्रतया अभिहितः गृहीतातिथिसत्कारः सः मुनिः तां प्रणम्य तद्गृहाद् निरगच्छत्। 5

I. प्रश्नाः— ½ × 2 = 1

1. गृहिणी कस्य सेवां अकरोत्? (i) मुनेः (ii) मातापित्रोः (iii) पत्युः

2. अनन्यगोचरः कः अस्ति? (i) बलाका (ii) वृत्तान्तः (iii) मुनिः

II. पूर्णवाक्येन उत्तरत— 2 × 1 = 2

मुनिः बद्धाञ्जलिः भूत्वा गृहिणीम् किम् अवदत्?

III. भाषिककार्यम्— 1 × 2 = 2

1. 'न भर्तृसेवायाः अपरं कञ्चन धर्मं करोम्यम्' अत्र करोमि पदस्य कर्तृपदं किम्?

(i) भर्तृ (ii) धर्मं (iii) अहम्

2. 'सर्वविदा पतिव्रतया' अत्र किं विशेषणपदं प्रयुक्तम्?

(आ) पद्यांशः

विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्पावयत्।
विश्वमेकं कुटुम्बं समालोकयत्
भूतले भाति मेऽनारतं भारतम्। 5

SUNIL TUTORIAL

प्रश्नाः— ½ × 2 = 1

I. एकपदेन उत्तरत–

1. भारतं किम् उद्घोषयति?

(*i*) पावनं (*ii*) चरित्रं (*iii*) विश्वबन्धुत्वम्

2. भारतं कीदृशैः चरित्रैः जगत्पावयति?

(*i*) जाह्नवी (*ii*) चन्द्रभागा (*iii*) विश्वबन्धैः (*iv*) तुङ्गभद्राः

II. पूर्णवाक्येन उत्तरत— 2 × 1 = 2

विश्वम् एकं कुटुम्बं किं पश्यति?

III. भाषिककार्यम्— 1 × 2 = 2

1. 'समालोकयत्' अत्र कः प्रत्ययः?

(*i*) शतृ (*ii*) क्त (*iii*) तुमुन्

2. 'पावयत्' शब्दस्य अर्थः अस्ति।

(*i*) पवित्रीकुर्वन् (*ii*) पापमयम्

**(इ) नाट्यांशः** 5

**प्रथमः भिल्लः** — हा धिक्! कीदृशः समयः आगतः! देशभक्तः प्रतापोऽपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः।

**द्वितीयः भिल्लः** — न जानेऽस्य मेवाडदेशस्य भाग्ये किं लिखितम्? हा निष्ठुर दैव! देशभक्ते तु दयस्व।

**तृतीयः भिल्लः** — वराकोऽयं जीवनसामग्रीयुद्धसामग्रयोः अभावेन खिद्यते। परमेश्वर! दयस्व! मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः? (सर्वे भिल्लाः विलपन्ति)

**एकः सैनिकः** — हा दैव! कथं दशधर्मौ प्रति निष्ठुरः सञ्जातोऽसि? (प्रतापं प्रति) महाराज! मदीयेन एव खड्गेन जहि माम्। न शक्नोमि स्वचक्षुषा द्रष्टुं स्वदेशदुर्दशाम्।

I. प्रश्नाः— ½ × 2 = 1

1. देशधर्मौ प्रति निष्ठुरः कः सञ्जातः?

(*i*) प्रतापः (*ii*) भिल्लः (*iii*) दैवः

2. के स्वदेशदुर्दशाम् स्वचक्षुषा द्रष्टुं न शक्नोमि?

(*i*) भिल्लाः (*ii*) प्रतापः (*iii*) सैनिकाः

II. पूर्णवाक्येन उत्तरत— 2 × 1 = 2

प्रतापः कयोः अभावेन खिद्यते?

III. भाषिककार्यम्— 1 × 2 = 2

1. 'जहि' अत्र का धातुः?

(*i*) जह् (*ii*) हि (*iii*) हन्

2. 'प्रस्थितः' अत्र कः प्रत्ययः?

(*i*) प्र (*ii*) क्त (*iii*) तम्

JSUNILTUTORIAL

**10. अधोलिखितपद्यांशद्वयस्य अन्वययोः रिक्तस्थानपूर्तिं कुरुत—** **5**

(क) **न कर्तुं समर्थोऽस्मि चर्चां विचारं,**
**न यज्ञं न दानं न मानं विहारं,**
**प्रकुर्यां कथं पालनं मे प्रजायाः,**
**क्षणो नास्ति लभ्यो यदा कल्पनायाः।** ½ × 5 = 2½

**अन्वयः—** चर्चां विचारं न कर्तुं (*i*) ........................ अस्मि। न यज्ञं न (*ii*) ........................ न मानं विहारं मे प्रजायाः (*iii*) ........................ कथं प्रकुर्यां यदा (*iv*) ........................ क्षणो (*v*) ........................ नास्ति।

(ख) **भारतं वर्तते मे परं सम्बलं भारतं नित्यमेव स्मरामि प्रियम्।**
**भारतेनास्ति मे जीवनं जीवनं भारतायार्पितं मेऽखिलं चेष्टितम्॥** ½ × 5 = 2½

**अन्वयः—** भारतं मे परं (*i*) ........................ वर्तते। प्रियम् (*ii*) ........................ नित्यम् एव स्मरामि (*iii*) ........................ एव मे जीवनं जीवनम् अस्ति। मे (*iv*) ........................ चेष्टितम् (*v*) ........................ अर्पितम्।

**11. अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत—** ½ × 10 = 5

1. भोजराजः लक्ष्मीधरस्य वाक्चातुर्येण प्रसन्नः भवति।
2. तन्तुवायः तन्तुवयनेन जीविकाम् अर्जयति स्म।
3. राजा भोजः मन्त्रिणं लक्ष्मीधरस्य आवासव्यवस्थायै आदिशति।
4. राजा तन्तुवायस्य पदयोजनां प्रशंसति।
5. समस्ते नगरे भ्रान्त्वा कमपि निरक्षरं मूर्खं वा जनम् न अपश्यत्।
6. त्वया मया सह राजसभां गन्तव्यम्।
7. महाशय! अहं त्रुटितान् तन्तून् संयोजयामि।
8. नगरपालः तन्तुवायं राजसभां नयति।
9. तन्तुवायः एकेन पद्येन स्वपरिचयं यच्छति।
10. राजा तेन प्रसन्नः भवति।

**12. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 1 × 5 = 5

1. पण्डितानाम् चेष्टितुम् दृष्ट्वा अष्टावक्रः हसितुं आरभत।
2. मनसः कार्यं संकल्पविकल्पौ।
3. सत्यं वदति भवान्।
4. मुनिः पिपासया पीडितः।
5. भारतीयं विज्ञानं सर्वहिताय अस्ति।

**13. अधोलिखितवाक्येषु रेखाङ्कितपदानां कृते उचितम् अर्थं चित्वा लिखत—** 1 × 5 = 5

1. महीरुहेभ्यः अर्थिनः निराशाः न यान्ति। (*i*) नृपेभ्य (*ii*) याचकेभ्यः (*iii*) वृक्षेभ्यः
2. चन्दनपादपस्य शाखा विहगैः आश्रिताः। (*i*) भ्रमरैः (*ii*) खगैः (*iii*) सर्पैः
3. अहो! एषां वरं जन्म सर्वप्राण्युपजीवनम्। (*i*) श्रेष्ठः (*ii*) अभिलाषा (*iii*) आश्रयः
4. हन्त! सम्प्रति जनानानं अतितापम् हरति। (*i*) अत्र (*ii*) इदानीम् (*iii*) दिने
5. नृत्यानि नित्यं धवलास्तरेषु। (*i*) धवल प्रस्तरेषु (*ii*) श्वेत शय्यासु (*iii*) कृष्ण अस्तरेषु (*iv*) शोभन शय्यासु

JSUNILTUTORIAL